M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref. / Ser. 489

Title: Rgveda Shakala Mantra Samhita

489

ऋग्वेद शाकलानाम् - मंत्रसंहिता
Incomplete

		Mantra Samhitā from	Title
		Rgveda (Shākala)	Author
			Editor
			Year, Vols.
			Publisher
489		Begins abruptly	Remarks

489

ऋग्वेद शाकलानाम् - मंत्रसंहिता
Incomplete

Mantra Samhitā from : Title
Rgveda (Shākala) : Author
: Editor
: Year, Vols.
: Publisher
489 Begins abruptly : Remarks

व्योनारण्या ग्राम्याश्चये। तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे। छंदांसि ज
ज्ञिरे तस्माद्यजुस्तस्मादजायत। तस्मादश्वा अजायंत ये के चोभयादतः। गावो
ह जज्ञिरे तस्माद्यजुस्तस्मादजायत। तस्मादश्वा अजायंत तस्माज्जाता अजाव
यः। यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन्। मुखं किमस्य कौ बाहू का ऊरू पादा उ
च्येते। ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः। ऊरू तदस्य यद्वैश्यः पद्भ्यां शू
द्रो अजायत। चंद्रमा मनसो जातश्चक्षोः सूर्यो अजायत। मुखादिंद्रश्चाग्नि
श्च प्राणाद्वायुरजायत। नाभ्या आसीदंतरिक्षं शीर्ष्णो द्यौः समवर्त्तत।
पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ अकल्पयन्। सप्तास्यासन्परिधयस्त्रिः
सप्त समिधः कृताः। देवा यद्यज्ञं तन्वाना अबध्नन्पुरुषं पशुं। यज्ञेन यज्ञमय
जंत देवास्तानि धर्माणि प्रथमान्यासन्। ते ह नाकं महिमानः सचंत यत्र पूर्वे


मं.स्र साध्याः संतिदेवाः॥ ३॥ ॥ अतोदेवा अवंतुनोयतो विष्णुर्विचक्रमे। पृथिव्याः सप्तधा
मभिः॥ इदंविष्णुर्विचक्रमेत्रेधानिदधेपदं। समूह्ळमस्यपांसुरे॥ त्रीणिपदाविचक्रमेविष्णु
॥८ र्गोपा अदाभ्यः। अतोधर्माणिधारयन्। विष्णोः कर्माणिपश्यतयतोव्रतानिपस्पशे।
इंद्रस्ययुज्यः सखा। तद्विष्णोः परमंपदं सदापश्यंतिसूरयः। दिवीवचक्षुराततं। तद्वि
प्रासोविपन्यवोजागृवांसः समिंधते। विष्णोर्यत्परमंपदं॥ ७॥ ॥ विष्णोर्नुकंवी
र्याणिप्रवोचंयः पार्थिवानिविममेरजांसि। योअस्कभायदुत्तरंसधस्थंविचक्रमा
णस्त्रेधोरुगायः। प्रतद्विष्णुस्तवतेवीर्येण मृगोनभीमः कुचरोगिरिष्ठाः। यस्योरुषु
त्रिषुविक्रमणेष्वधिक्षियंतिभुवनानिविश्वा। प्रविष्णवेशूषमेतुमन्म गिरिक्षित
ऋ२ उरुगायायवृष्णे। यइदंदीर्घंप्रयतंसधस्थमेकोविममेत्रिभिरित्पदेभिः। यस्य
त्री पूर्णामधुनापदान्यक्षीयमाणाः स्वधयामदंति। यउत्रिधातुपृथिवीमुतद्याम

मेकोदाधारभुवनानिविश्वा। तदस्यप्रियमभिपाथोअश्यांनरोयत्रदेवयवोमदंति।
उरुक्रमस्यसहिबंधुरित्था विष्णोः पदेपरमेमध्वउत्सः। तावांवास्तून्युश्मसिगमध्यैयत्र
गावोभूरिशृंगा अयासः। अत्राहतदुरुगायस्यवृष्णः परमंपदमवभातिभूरि॥ ५॥
॥ ॥ प्रवः पांतमंधसोधियायतेमहेशूराय विष्णवेचार्चत। यासानुनिपर्वतानामदा
भ्यामहस्तस्थतुरर्वतेवसाधुना। त्वेषमित्थासमरणंशिमीवतोरिंद्राविष्णूसुतपावामु
रुष्यति। यामर्त्यायप्रतिधीयमानमित्कृशानोरस्तुरसनामुरुष्यथः। ताईंवर्धंतिमह्यस्य
पौंस्यंनिमातरानयतिरेतसेभुजे। दधातिपुत्रोवरंपरंपितुर्नामतृतीयमधिरोचनेदिवः।
तत्तदिदस्यपौंस्यंगृणीमसीनस्यत्रातुरवृकस्यमीळ्हुषः। यः पार्थिवानित्रिभिरिद्विगा
मभिरुरुक्रमिष्टोरुगायायजीवसे। द्वेइदस्यक्रमणेस्वर्दृशोभिख्यायमर्त्योभुरण्यति।

मंत्रसं तृतीयमस्यनकिरादधर्षतिवयश्चनपतयंतःपतत्रिणः।चतुर्भिःसाकंनवतिंचनाम
६ भिश्चक्रंनवृत्तंव्यतींरवीविपत्।बृहच्छरीरोविमिमानऋक्वभिर्युवाकुमारःप्रत्येत्याहवं॥
॥६॥ ॥भवामित्रोनशेव्योघृतासुतिर्विभूतद्युम्नएवयाउसप्रथाः।अधातेविष्णोविदुषा
चिदर्ध्यस्तोमोयज्ञश्चराध्योहविष्मता।यःपूर्व्यायवेधसेनवीयसेसुमज्जानयेविष्णवेद
दाशति।योजातमस्यमहतोमहिब्रवत्सेदुश्रवोभिर्युज्यंचिदभ्यसत्।तमुस्तोतारःपूर्व्यं
यथाविदऋतस्यगर्भंजनुषापिपर्तन।आस्यजानंतोनामचिद्विवक्तनमहस्तेविष्णो
सुमतिंभजामहे।तमस्यराजावरुणस्तमश्विनाक्रतुंसचंतमारुतस्यवेधसः।दाधारद
क्षमुत्तममहर्विदंव्रजंचविष्णुःसखिवाँअपोर्णुते।आयोविवायसचथायदैव्यइंद्राय
विष्णुःसुकृतेसुकृत्तरः।वेधाअजिन्वत्त्रिषधस्थआर्यमृतस्यभागेयजमानमाभजत्

नवधियेमत

॥७॥ ॥संवांकर्मणासमिषाहिनोमींद्राविष्णूअपसस्पारेअस्य।जुषेथांयज्ञंद्रविणंच
धत्तमरिष्टैर्नःपथिभिःपारयंता।याविश्वासांजनितारामतीनामिंद्राविष्णूकलशासो
मधाना।प्रवांगिरःशस्यमानाअवंतुप्रस्तोमासोगीयमानासोअर्कैः।इंद्राविष्णूमदपतीमदा
नामासोमंयातंद्रविणोदधाना।संवामंजंत्वक्तुभिर्मतीनांसंस्तोमासःशस्यमानासउक्थैः।
आवामश्वासोअभिमातिषाहइंद्राविष्णूसधमादोवहंतु।जुषेथांविश्वाहवनामतीनामु
पब्रह्माणिशृणुतंगिरोमे।इंद्राविष्णूतत्पनयाय्यंवांसोमस्यमदउरुचक्रमाथे।अकृणु
तमंतरिक्षंवरीयोप्रथतंजीवसेनोरजांसि।इंद्राविष्णूहविषावावृधानाग्राद्वानानमसारा
तहव्या।घृतासुतीद्रविणंधत्तमस्मेसमुद्रस्थःकलशःसोमधानः।इंद्राविष्णूपिबतंमध्वो
अस्यसोमस्यदस्राजठरंपृणेथां।आवामंधांसिमदिराण्यग्मन्नुपब्रह्माणिशृणुतंह
वंमे।उभाजिग्यथुर्नपराजयेथेनपराजिग्येकतरश्चनैनोः।इंद्रश्चविष्णोयदपस्पृधेथां



मंत्रसं॰ त्रेधासहस्रंवितदैरयेथां ॥८॥ ॥परोमात्रयातन्वावृधाननतेमहित्वमन्वश्नुवंति।उभेते
॥१० विद्मरजसीपृथिव्याविष्णोदेवत्वंपरमस्यवित्से।नतेविष्णोजायमानोनजातोदेवमहिम्नःप
रमंतमाप।उदस्तभ्नानाकमृष्वंबृहंतंदाधर्थप्राचींककुभंपृथिव्याः।इरावतीधेनुमतीहि थं३
भूतंसूयवसिनीमनुषेदशस्या।व्यस्तभ्नारोदसीविष्णवेतेदाधर्थपृथिवीमभितोम
यूखैः।उरुंयज्ञायचक्रथुरुलोकंजनयंतासूर्यमुषासमग्निं।दासस्यचिद्वृषशिप्रस्य
मायाजघ्नथुर्नरापृतनाज्येषु।इंद्राविष्णूदृंहिताःशंबरस्यनवपुरोनवतिंचश्नथिष्टं।
शतंवर्चिनःसहस्रंचसाकंहथोअप्रत्यसुरस्यवीरान्।इयंमनीषाबृहतीबृहंतोरुक्र
मातवसावर्धयंती।ररेवांस्तोमंविदथेषुविष्णोपिन्वतमिषोवृजनेष्विंद्र।वषट्तेवि १०
ष्णवासआकृणोमितन्मेजुषस्वशिपिविष्टहव्यं।वर्धंतुत्वासुष्टुतयोगिरोमेयूयंपा
तस्व॰॥९॥ ॥नूमर्तोदयतेसनिष्यन्योविष्णवउरुगायायदाशात्।प्रयःसत्राचा

मनसायजातएतावंतंनर्यमाविवासात्।त्वंविष्णोसुमतिंविश्वजन्यामप्रयुतामेवयावोमतिं
दाः।पर्चोयथानःसुवितस्यभूरेरश्वावतःपुरुश्चंद्रस्यरायः।त्रिर्देवःपृथिवीमेषएतांविचक्रमे
शतर्चसंमहित्वा।प्रविष्णुरस्तुतवसस्तवीयांत्वेषंह्यस्यस्थविरस्यनाम।विचक्रमेपृथिवीमेष
एतांक्षेत्रायविष्णुर्मनुषेदशस्यन्।ध्रुवासोअस्यकीरयोजनासउरुक्षितिंसुजनिमाचकार॥
प्रतत्तेअद्यशिपिविष्टनामार्यःशंसामिवयुनानिविद्वान्।तंत्वागृणामितवसमतव्यान्क्ष
यंतमस्यरजसःपराके।किमित्तेविष्णोपरिचक्ष्यंभूत्प्रयद्ववक्षेशिपिविष्टोअस्मि।माव
र्पोअस्मदपगूहएतद्यदन्यरूपःसमिथेबभूथ।वषट्ते॰॥१॥ ॥धर्मासमंतात्रिवृतंव्या
पतुस्तयोर्जुष्टिंमातरिश्वाजगाम।दिवस्पयोदिधिषाणाअवेषन्विदुर्देवाःसहसामानम
र्कं।तिस्रोदेष्ट्रायनिर्ऋतीरुपासतेदीर्घश्रुतोविहिजानंतिवह्नयः।तासांनिचिक्युःकवयो
निदानंपरेषुयागुह्येषुव्रतेषु।चतुष्कपर्दायुवतिःसुपेशाघृतप्रतीकावयुनानिवस्ते।तस्यां

मंत्र सुपर्णा इषणा । निषेदुर्यत्र देवा दाधिरे भागधेयं । एकः सुपर्णः स समुद्रमा विवेश स इदं वि
११ श्वं भुवनं विचष्टे । तं पाकेन मनसापश्यमंतितस्तं माता रेळ्हि स उ रेळ्हि मातरं । सुपर्णं
विप्राः कवयो वचोभिरेकं संतं बहुधा कल्पयंति । छंदांसि च दधतो अध्वरेषु ग्रहान्
सोमस्य मिमते द्वादश ॥१०॥ ॥षट्त्रिंशांश्च चतुरः कल्पयंतश्छंदांसि च दधत आद्वाद
शं । यज्ञं विमाय कवयो मनीष ऋक्सामाभ्यां प्र रथं वर्त्तयंति । चतुर्दशान्ये महिमा
नो अस्य तं धीरा वाचा प्रणयंति सप्त । आप्नानं तीर्थं क इह प्र वोचद्येन पथा प्रपिबंत सु
तस्य । सहस्रधा पंचदशान्युक्था यावद्द्यावापृथिवी तावदित्तत् । सहस्रधा महिमानः ११
सहस्रं यावद्ब्रह्म विष्ठितं तावती वाक् । कश्छंदसां योगमा वेद धीरः को धिष्ण्यां प्रति
वाचं पपाद । कमृत्विजामष्टमं शूरमाहुर्हरी इंद्रस्य नि चिकाय कः स्वित् । भूम्या अं

यत्ते पवित्रमर्चिष्वग्ने विततमंतरा । ब्रह्म तेन पुनीहि नः । ब्रह्मसवैः पुनीहि नः ।
त्ये
तं पर्येके चरंति रथस्य धूर्षु युक्तासो अस्थुः । श्रमस्य दायं वि भजंत्येभ्यो यदा यमो भवति ह
र्म्ये हितः ॥१२॥ ॥ अस्र यंदेववीतये वाजयंतो रथा इव । ते सुतासो मदिंतमाः शुक्रा वा
युमसृक्षत । ग्राव्णा तुन्नो अभिष्टुतः पवित्रं सोम गच्छसि । दधत्स्तोत्रे सुवीर्यं । एष तुन्नो अभिष्टु
तः पवित्रमति गाहते । रक्षोहा वारमव्ययं ॥१३॥ ॥ यदंति यच्च दूरके भयं विंदति मामिह । पव
मान वि तज्जहि । पवमानः सो अद्य नः पवित्रेण विचर्षणिः । यः पोता स पुनातु नः । यत्ते पवित्र
मर्चिष्यग्ने विततमंतरा । ब्रह्म तेन पुनीहि नः । उभाभ्यां देव सवितः पवित्रेण सवेन च । मां पुनी
हि विश्वतः ॥१४॥ ॥ त्रिभिष्ट्वं देव सवितर्वर्षिष्ठैः सोम धामभिः । अग्ने दक्षैः पुनीहि नः । पुनंतु
मां देवजनाः पुनंतु वसवो धिया । विश्वे देवाः पुनीत मा जातवेदः पुनीहि मा । प्र प्यायस्व प्र स्यंद
स्व सोम विश्वेभिरंशुभिः । देवेभ्य उत्तमं हविः । उप प्रियं पनिप्नतं युवानमाहुतीवृधं । अगन्म
बिभ्रतो नमः । अलाय्यस्य परशुर्ननाश तमा पवस्व देव सोम । आखुं चिदेव देव सोम । यः

मंत्र पावमानीर्योध्येत्यृषिभिः संभृतं रसं । तस्मै सरस्वती दुहे क्षीरं सर्पिर्मधूदकं । यत्रेंदो पवमानस्या
नुधामान्यक्रमीत् । तन्नाकः सुप्रजा इति यस्ते सोमाविधन्मन इंद्रायेंदो परिस्रव । सप्तमंत्रकृतास्तो
॥१२ मैकश्यपोद्वर्धयन्गिरः सोमं नमस्य राजानं योजज्ञे वीरुधां पतिरिंद्रायेंदो परिस्रव । सप्त दिशो
नानासूर्याः सप्त होतार ऋत्विजः देवा आदित्या ये सप्त तेभिः सोमाभिरक्षन इंद्रा० । यन्ते राज
ञ्छृतं हविस्तेन सोमाभिरक्षनः इंद्रा० । अरातीवा मानस्तारीन्मो च नः किंचनाममत् इंद्रा० । यत्रत दं
त्परमंपराविद्धो लोके किं महीयते । देवैः सुकृत कर्मभिस्तत्र माममृतं कृधी इंद्रा० ॥१६॥ । यिंइंदोः
पवमानस्यानुधामान्यक्रमीत् । समुद्रादूर्मिर्मधुमां उदारदुपांशुना सममृतत्वमानट् । घृत
स्य नाम गुह्यं यदस्ति जिह्वा देवानाममृतस्य नाभिः । वयं नाम प्रब्रवामा घृतस्यास्मिन्यज्ञे धा १२॥
रयामा नमोभिः । उप ब्रह्मा शृणवच्छस्यमानं चतुःशृंगोवमीद्गौर एतत् । चत्वारि शृंगा
त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य । त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां

आविवेश । त्रिधा हितं पणिभिर्गुह्यमानं गवि देवासो घृतमन्वविंदन् । इंद्र एकं सूर्य एकं जजान
वेनादेकं स्वधया निष्टतक्षुः । एता अर्षंति हृद्यात्समुद्राच्छतव्रजा रिपुणा नावचक्षे । घृतस्य धारा
अभिचाकशीमि हिरण्ययो वेतसो मध्य आसां ॥१७॥ । सम्यक्स्रवंति सरितो न धेना अंतर्हृदा
मनसा पूयमानाः । एते अर्षंत्यूर्मयो घृतस्य मृगा इव क्षिपणोरीषमाणाः । सिंधोरिव प्राध्वने शू
घनासो वातप्रमियः पतयंति यह्वाः । घृतस्य धारा अरुषो न वाजी काष्ठा भिंदन्नूर्मिभिः पिन्वमा
नः । अभि प्रवंत समनेव योषाः कल्याण्यः स्मयमानासो अग्निं । घृतस्य धाराः समिधो न
संतता जुषाणो हर्यति जातवेदाः । कन्या इव वहतुमेतवा उ अंज्यंजाना अभिचाकशीमि । यत्र
सोमः सूयते यत्र यज्ञो घृतस्य धारा अभि तत्पवंते । अभ्यर्षत सुष्टुतिं गव्यमाजिमस्मासु भ
द्रा द्रविणानि धत्त । इमं यज्ञं नयत देवता नो घृतस्य धारा मधु मत्पवंते । धामंते विश्वं भु
वनमधिश्रितमंतः समुद्रे हृद्यंतरायुषि । अपामनीके समिथे य आभृतस्तमश्याम म

मंत्र. धुमंतनुर्मि॥१८॥ ॥एतानि सूक्तानि दैवस्याग्निवेके। अंत्यस्य त्वंपूर्णीकृतोप्रयुज्यते। यो
रूपंवैश्वदेवंघार्म्यपवस्वेतित्रिवर्गतः। यद्देरेकवर्गश्चसमुद्रादूर्मिरित्यपि॥ ॥अस्यवामस्य
१३ पलितस्यहोतुस्तस्यभ्राता मध्यमो अस्त्यश्नः। तृतीयोभ्राताघृतपृष्ठोअस्यात्रोप
श्यंविश्पतिंसप्तपुत्रं। सप्तयुंजंतिरथमेकचक्रमेको अश्वोवहतिसप्तनामा। त्रिनाभि
चक्रमजरमनर्वं यत्रेमाविश्वाभुवनाधितस्थुः। इमं रथमधियेसप्ततस्थुःसप्तचक्रं
सप्तवहंत्यश्वाः। सप्तस्वसारो अभिसंनवंते यत्रगवांनिहितासप्तनाम। कोददर्शप्र
थमंजायमानमस्थन्वंतंयदनस्थाबिभर्ति। भूम्याअसुरसृग्आत्माक्वस्वित्कोवि
द्वांसमुपगात्प्रष्टुमेतत्। पाकः पृच्छामिमनसाविजानन्देवानामेनानिहितापदानि।
वत्सेबष्कयेधिसप्ततंतून्विततन्निरेकवयओतवाउ॥१॥ ॥अचिकित्वांच्चिकितुष
श्चिदत्रकवीन्पृच्छामिविद्मनेनविद्वान्। वियस्तस्तंभषळिमारजांस्यजस्यरूपेकिम १२

पिस्विदेकं। इहब्रवीतुयइमंगवेदास्यवामस्यवामस्यनिहितंपदंवेः। शीर्ष्णःक्षी
रंदुह्रते गावोअस्यवव्रिंवसानाउदकंपदापुः। मातापितरमृतआबभाजधीत्यग्रे
मनसासंहिजग्मे। साबीभत्सुर्गर्भरसानिविद्धानमस्वंतइदुपवाकमीयुः। युक्ता
मातासीद्धुरिदक्षिणायाअतिष्ठद्गर्भोवृजनीष्वंतः। अमीमेद्वत्सोअनुगामपश्य
द्विश्वरूप्यंत्रिषुयोजनेषु। तिस्त्रोमातॄस्त्रीन्पितॄन्बिभ्रदेकऊर्ध्वस्तस्थौनेमव ग्ला
पयंति। मंत्रयंतेदिवोअमुष्यपृष्ठेविश्वविदंवाचमविश्वमिन्वां २ द्वादशारं न
हितज्जरायववर्वर्तिचक्रंपरिद्यामृतस्य। आपुत्राअग्नेमिथुनासोअत्रसप्तशता
निविंशतिश्चतस्थुः। पंचपादंपितरंद्वादशाकृतिंदिवआहुःपरेअर्धेपुरीषिणं। अ
थेमेअन्यउपरेविचक्षणंसप्तचक्रेषळरआहुरर्पितं। पंचारेचक्रेपरिवर्तमानेत
स्मिन्नातस्थुर्भुवनानिविश्वा। तस्यनाक्षस्तप्यतेभूरिभारःसनादेवनशीर्यतेस

मक्रु, १।

नाभिः। सनेमिचक्रमजरंविवावृतउत्तानायांदशयुक्तावहंति। सूर्यस्यचक्षूरजसैत्या
मंत्र· वृतंतस्मिन्नार्पिताभुवनानिविश्वा। साकंजानांसप्तथमाहुरेकजंषळिद्यमाऋषयो
४ देवजाइति। तेषामिष्टानिविहितानिधामशःस्थात्रेरेजंतेविकृतानिरूपशः। ३
स्त्रियःसतीस्तांउमेपुंसआहुःपश्यदक्षण्वान्नविचेतदंधः। कविर्यःपुत्रःसईमाचिकेत
यस्ताविजानात्सपितुष्पितासत्। अवःपरेणपरएनावरेणपदावत्संबिभ्रतीगौरुदस्थात्।
साकद्रीचीकंस्विदर्धंपरागात्क्वस्वित्सूतेनहियूथेअंतः। अवःपरेणपितरंयोअस्यानुवे
दपरएनावरेण। कवीयमानःकइहप्रवोचद्देवंमनःकुतोअधिप्रजातं। येअर्वाचस्तांउ
पराचआहुर्येपरांचस्तांउअर्वाचआहुः। इंद्रश्चयाचक्रथुःसोमतानिधुरानयुक्ता
रजसोवहंति। द्वासुपर्णासयुजासखायासमानंवृक्षंपरिषस्वजाते। तयोरन्यःपिप्प
लंस्वाद्वत्त्यनश्नन्नन्योअभिचाकशीति ४ यत्रासुपर्णाअमृतस्यभागमनिमेषं

विदथाभिस्वरंति। इनोविश्वस्यभुवनस्यगोपाःसमाधीरःपाकमत्राविवेश। यस्मिन्वृ
क्षेमध्वदःसुपर्णानिविशंतेसुवतेचाधिविश्वे। तस्येदाहुःपिप्पलंस्वाद्वग्रेतन्नोन्नश
द्यःपितरंनवेद। यद्गायत्रेअधिगायत्रमाहितंत्रैष्टुभाद्वात्रैष्टुभंनिरतक्षत। यद्वाजग
ज्जगत्याहितंपदंयइत्तद्विदुस्तेअमृतत्वमानशुः। गायत्रेणप्रतिमिमीतेअर्कमर्के
णसामत्रैष्टुभेनवाकं। वाकेनवाकंद्विपदाचतुष्पदाक्षरेणमिमतेसप्तवाणीः। जगता
सिंधुंदिव्यस्तभायद्रथंतरेसूर्यंपर्यपश्यत्। गायत्रस्यसमिधस्तिस्रआहुस्ततोम
ह्नाप्ररिरिचेमहित्वा ॥ ५ ॥ उपह्वयेसुदुघांधेनुमेतांसुहस्तोगोधुगुतदोहदेनां। श्रेष्ठं
सवंसवितासाविषन्नोभीद्धोघर्मस्तदुषुप्रवोचं। हिंकृण्वतीवसुपत्नीवसूनांवत्समिच्छंती
मनसाभ्यागात्। दुहामश्विभ्यांपयोअघ्न्येयंसावर्धतांमहतेसौभगाय। गौरमीमेदनु
वत्संमिषंतंमूर्धानंहिंङ्ङकृणोन्मातवाउ। सृक्वाणंघर्ममभिवावशानामिमातिमायुं

पयंतु पयोभिः। अयं स शिंक्ते येन गौरभीवृता मिमाति मायुं ध्वसनावधि श्रिता। सा चित्ति
मंत्र· भिर्नि हि चकार मर्त्यं विद्युद्भवंती प्रति वव्रिमौहत। अनच्छये तुरगातु जीवमेजद्ध्रुवं मध्य
१५ । आ पस्त्यानां। जीवो मृतस्य चरति स्वधाभिरमर्त्यो मर्त्येना सयोनिः।। ६ अपश्यं गोपा
मनिपद्यमानमा च परा च पथिभिश्चरंतं। स सध्रीचीः स विषूचीर्वसान आ वरीवर्ति भुवने
ष्वंतः।। य ईं चकार न सो अस्य वेद य ईं ददर्श हिरुगिन्नु तस्मात्। स मातुर्योना परिवीतो
अंतर्बहुप्रजा निर्ऋतिमा विवेश। द्यौर्मे पिता जनिता नाभिरत्र बंधुर्मे माता पृथिवी महीयं।
उत्तानयोश्चम्वो३र्योनिरंतरत्रा पिता दुहितुर्गर्भमाधात्। पृच्छामि त्वा परमंतं पृथिव्याः पृ
च्छामि यत्र भुवनस्य नाभिः। पृच्छामि त्वा वृष्णो अश्वस्य रेतः पृच्छामि वाचः परमं व्योम।
इयं वेदिः परो अंतः पृथिव्या अयं यज्ञो भुवनस्य नाभिः। अयं सोमो वृष्णो अश्वस्य रेतो ब्र
ह्मायं वाचः परमं व्योम ७ सप्तार्धगर्भा भुवनस्य रेतो विष्णोस्तिष्ठंति प्रदिशा विधर्म १५

णि। ते धीतिभिर्मनसा ते विपश्चितः परिभुवः परि भवंति विश्वतः।। न वि जानामि यदि वेदम
स्मि निण्यः संनद्धो मनसा चरामि। यदा मागन्प्रथमजा ऋतस्यादिद्वाचो अश्नुवे भागम
स्याः। अपाङ्प्राङेति स्वधया गृभीतोमर्त्यो मर्त्येना सयोनिः। ता शश्वंता विषूचीना वियं
तान्यं१न्यं चिक्युर्न नि चिक्युरन्यं। ऋचो अक्षरे परमे व्योमन्यस्मिन्देवा अधि विश्वे निषे
दुः। यस्तन्न वेद किमृचा करिष्यति य इत्तद्विदुस्त इमे समासते। सूयवसाद्भगवती हि
भूया अथो वयं भगवंतः स्याम। अद्धि तृणमघ्न्ये विश्वदानीं पिब शुद्धमुदकमाचरंती ८ ।
गौरीर्मिमाय सलिलानि तक्षत्येकपदी द्विपदी सा चतुष्पदी। अष्टापदी नवपदी बभूवु
षी सहस्राक्षरा परमे व्योमन्। तस्याः समुद्रा अधि वि क्षरंति तेन जीवंति प्रदिशश्चत
स्रः। ततः क्षरत्यक्षरं तद्विश्वमुप जीवति। शकमयं धूममारादपश्यं विषूवता पर एनो
वरेण। उक्षाणं पृश्निमपचंत वीरास्तानि धर्माणि प्रथमान्यासन्। त्रयः केशिन ऋतुथा

मं.ऋ. त्री विचक्षते संवत्सरे वपत एक एषां। विश्वमेको अभिचष्टे शचीभिर्ध्राजिरेकस्य ददृशे न रूपं।
१६ ॥ चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः। गुहा त्रीणि निहिता नेंगयं
ति तुरीयं वाचो मनुष्या वदंति। इंद्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान्।
एकं सद्विप्रा बहुधा वदंत्यग्निं यमं मातरिश्वानमाहुः। ॥१०॥ कृष्णं नियानं हरयः सुपर्णा
अपो वसाना दिवमुत्पतंति। त आववृत्रन्त्सदनादृतस्यादिद्घृतेन पृथिवी व्युद्यते। द्वाद
श प्रधयश्चक्रमेकं त्रीणि नभ्यानि क उ तच्चिकेत। तस्मिन्त्साकं त्रिशता न शंकवोर्पिताः
षष्टिर्न चलाचलासः। यस्ते स्तनः शशयो यो मयोभूर्येन विश्वा पुष्यसि वार्याणि। यो रत्न
धा वसुविद्यः सुदत्रः सरस्वति तमिह धातवे कः। यज्ञेन यज्ञमयजंत देवास्तानि धर्मा
णि प्रथमान्यासन्। ते ह नाकं महिमानः सचंत यत्र पूर्वे साध्याः संति देवाः। समानमे
तदुदकमुच्चैत्यव चाहभिः। भूमिं पर्जन्या जिन्वंति दिवं जिन्वंत्यग्नयः॥ दिव्यं सुपर्णं वाय १५

सं बृहंतमपां गर्भं दर्शतमोषधीनां। अभीपतो वृष्टिभिस्तर्पयंतं सरस्वंतमवसे जोहवी
मि। ॥१०॥ ॥इति वामन सूक्तं॥ ॥अथ हरिसूक्तं॥ ॥अयं ते अस्तु हर्यतः सोम
आ हरिभिः सुतः। जुषाण इंद्र हरिभिर्न आ गह्या तिष्ठ हरितं रथं। हर्यन्नुषसमर्चयः
सूर्यं हर्यन्नरोचयः। विद्वांश्चिकित्वान्हर्यश्व वर्धस इंद्र विश्वा अभि श्रियः। द्यामिंद्रो ह
रिधायसं पृथिवीं हरिवर्पसं। अधारयद्धरितोर्भूरि भोजनं ययोरंतर्हरिश्चरत्। जज्ञानो
हरितो वृषा विश्वमाभाति रोचनं। हर्यश्वो हरितं धत्त आयुधमा वज्रं बाह्वोर्हरिं। इंद्रो हर्य
न्तमर्जुनं वज्रं शुक्रैरभीवृतं। अपावृणोद्धरिभिरद्रिभिः सुतमुद्गा हरिभिराजत। १ आ
मंद्रैरिंद्र हरिभिर्याहि मयूररोमभिः। मा त्वा के चिन्नि यमन्विं न पाशिनोऽति धन्वेव ताँ इ
हि। वृत्रखादो वलं रुजः पुरां दर्मो अपामजः। स्थाता रथस्य हर्योरभिस्वर इंद्रो दृळ्हा चि
दारुजः। गंभीराँ उदधीँरिव क्रतुं पुष्यसि गा इव। प्र सुगोपा यवसं धेनवो यथा ह्रदं

मंत्रे॰ कुल्यारेवाशत॥ आनस्तुजं रयिंभरांशंनप्रतिजानते॥ वृक्षंपक्वंफलमंकीवधूनुहींद्र
संपारणांवसु॥ स्वयुरिंद्रस्वराळसिस्मद्दिष्टिः स्वयशास्तरः॥ सवावृधानओजसापुरु
७ ष्टुतभवानः सुश्रवस्तमः॥ ॥२ प्रतेमहेविदथेशंसिषंहरीप्रतेवन्ववनुषोहर्यतंमदं
घृतंनयोहरिभिश्चारुसेचतआत्वाविशंतुहरिवर्पसंगिरः॥ हरिंहियोनिमभियस
मस्वरन्हिन्वंतोहरीदिव्यंयथासदः॥ आयंपृणंतिहरिभिर्नधेनवइंद्रायशूषंहरिव
न्तमर्चत॥ सोअस्यवज्रोहरितोयआयसोहरिर्निकामोहरिरागभस्त्योः॥ द्युम्नी
सुशिप्रोहरिमन्युसायकइंद्रेनिरूपाहरितामिमिक्षिरे॥ दिविनकेतुरधिधायिहर्
यतोविव्यचद्वज्रोहरितोनरंह्या॥ तुददहिंहरिशिप्रोयआयसःसहस्रशोकाअभ
वद्धरिंभरः॥ त्वंत्वमहर्यथाउपस्तुतःपूर्वेभिरिंद्रहरिकेशयज्वभिः॥ त्वंहर्यसि
तवविश्वमुक्थ्यमसामिराधोहरिजातहर्यतं॥ ३ तावज्रिणंमंदिनंस्तो
म्यंमदइंद्रंरथेवहतोहर्यताहरी॥ पुरूण्यस्मैसवनानिहर्यतइंद्रायसोमाहरयोद
धन्विरे॥ अरंकामायहरयोदधन्विरेस्थिरायहिन्वन्हरयोहरीतुरा॥ अर्वद्भिर्यो
हरिभिर्जोषमीयतेसोअस्यकामंहरिवंतमानशे॥ हरिश्मशारुर्हरिकेशआयसस्तुरस्पेयेयोहरिपाअवर्धत॥ अर्वद्भिर्योहरिभिर्वाजिनीवसुरतिवि
श्वादुरितापारिषद्धरी॥ स्रुवेवयस्यहरिणीविपेततुःशिप्रेवाजायहरिणीदवि
ध्वतः॥ प्रयत्कृतेचमसेमर्मृजद्धरीपीत्वामदस्यहर्यतस्यांधसः॥ उतस्मसद्मह
र्यतस्यपस्त्योरत्योनवाजंहरिवाँअचिक्रदत्॥ महीचिद्धिधिषणाहर्यदोजसाबृहद्वयोदधिषेहर्यतश्चिदा॥ ४ आरोदसीहर्यमाणोमहित्वानव्यंन
व्यंहर्यसिमन्मनुप्रियं॥ प्रपस्त्यमसुरहर्यतंगोराविष्कृधिहरयेसूर्याय॥ आत्वाह

रु.प्र. र्वतं प्रयुजो जनानां रथे वहंतु हरिशिप्रमिंद्र। पिबा यथा प्रतिभृतस्य मध्वो ह
१८ र्यश्वं यज्ञं सधमादे दशोणिं। अपाः पूर्वेषां हरिवः सुतानामथो इदं सवनं केवलं
ते। ममद्धि सोमं मधुमंतमिंद्र सत्रा वृषं जठर आ वृषस्व॥ ५ ॥ अथ रुद्रसूक्ता
नि॥ ॥कद्रुद्राय प्रचेतसे मीढुष्टमाय तव्यसे। वोचेम शंतमं हृदे। यथा
नो अदितिः करत्पश्वे नृभ्यो यथा गवे। यथा तोकाय रुद्रियं। यथा नो मित्रो वरु
णो यथा रुद्रश्चिकेतति। यथा विश्वे सजोषसः। गाथपतिं मेधपतिं रुद्रं जलाष
भेषजं। तच्छंयोः सुम्नमीमहे। यः शुक्र इव सूर्यो हिरण्यमिव रोचते। श्रेष्ठो देवा
नां वसुः॥ ॥२॥ शं नः करत्यर्वते सुगं मेषाय मेष्ये। नृभ्यो नारिभ्यो गवे। अस्मे
सोम श्रियमधि नि धेहि शतस्य नृणां। महि श्रवस्तुविनृम्णं। मा नः सोमप ॥१८॥
रिबाधो मारातयो जुहुरंत। आ न इंदो वाजे भज। यास्ते प्रजा अमृतस्य पर

स्मिन्धामन्नृतस्य। मूर्धा नाभा सोम वेन आभूषंतीः सोम वेदः। ३। इत्येकं।
इमा रुद्राय तवसे कपर्दिने क्षयद्वीराय प्रभरामहे मतीः। यथा शमसद्द्विपदे चतुष्प
दे विश्वं पुष्टं ग्रामे अस्मिन्ननातुरं। मृळा नो रुद्रोत नो मयस्कृधि क्षयद्वीराय नमसा
विधेम ते। यच्छं च योश्च मनुरायेजे पिता तदश्याम तव रुद्र प्रणीतिषु। अश्याम ते
सुमतिं देवयज्यया क्षयद्वीरस्य तव रुद्र मीढ्वः। सुम्नायन्निद्विशो अस्माकमाच
रारिष्टवीरा जुहवाम ते हविः। त्वेषं वयं रुद्रं यज्ञसाधं वंकुं कविमवसे नि ह्वयामहे।
आरे अस्मद्दैव्यं हेळो अस्यतु सुमतिमिद्वयमस्या वृणीमहे। दिवो वराहमरुषं
कपर्दिनं त्वेषं रूपं नमसा नि ह्वयामहे। हस्ते बिभ्रद्भेषजा वार्याणि शर्म वर्म छ
र्दिरस्मभ्यं यंसत् ॥४॥ इदं पित्रे मरुतामुच्यते वचः स्वादोः स्वादीयो रुद्राय वर्ध
नं। रास्वा च नो अमृत मर्तभोजनं त्मने तोकाय तनयाय मृळ। मा नो महांतमु

मंत्र. तमानोअर्भकंमानउक्षंतमुतमानउक्षितं।मानोवधीःपितरंमोतमातरंमानः
१२ प्रियास्तन्वोरुद्ररीरिषः।मानस्तोकेतनयेमानआयौमानोगोषुमानोअश्वेषुरीरिषः।
वीरान्मानोरुद्रभामितोवधीर्हविष्मंतःसदमित्त्वाहवामहे।उपतेस्तोमान्पशुपाइ
वाकरंरास्वापितर्मरुतांसुम्नमस्मे।भद्राहितेसुमतिर्मृळयत्तमाथावयमवइत्तेवृ
णीमहे।आरेतेगोघ्नमुतपूरुषघ्नंक्षयद्वीरसुम्नमस्मेतेअस्तु।मृळाचनोअधिच
ब्रूहिदेवाधाचनःशर्मयच्छद्विबर्हाः।अवोचामनमोअस्माअवस्यवः।शृणोतुनो
हवंरुद्रोमरुत्वान्।तन्नोमित्रो०॥४॥ ॥इतिद्वितीयं॥ ॥आतेपितर्मरुतांसुम्नमे १२
तुमानःसूर्यस्यसंदृशोयुयोथाः।अभिनोवीरोअर्वतिक्षमेतप्रजायेमहिरुद्र
प्रजाभिः।त्वादत्तेभीरुद्रशंतमेभिःशतंहिमाअशीयभेषजेभिः।व्य१स्मद्द्वेषो

वितरंव्यंहोव्यमीवाश्चातयस्वाविषूचीः।श्रेष्ठोजातस्यरुद्रश्रियासितवस्तमस्तवसांवज्रबा
हो।पर्षिणःपारमंहसःस्वस्तिविश्वाअभीतीरपसोयुयोधि।मात्वारुद्रचुक्रुधामानमोभि
र्मादुष्टुतीवृषभमासहूती।उन्नोवीराँअर्पयभेषजेभिर्भिषक्तमंत्वाभिषजांशृणोमि॥
हवीमभिर्हवतेयोहविर्भिरवस्तोमेभीरुद्रंदिषीय।ऋदूदरःसुहवोमानोअस्यैबभ्रुःसुशि
प्रोरीरधन्मनायै॥५॥ ॥उन्मामममंदवृषभोमरुत्वांत्वक्षीयसावयसानाधमानं।घृणीव
छायामरपाअशीयाविवासेयंरुद्रस्यसुम्नं।क्वस्यतेरुद्रमृळयाकुर्हस्तोयोअस्तिभेष
जोजलाषः।अपभर्तारपसोदैव्यस्याभीनुमावृषभचक्षमीथाः।प्रबभ्रवेवृषभायश्वि
तीचेमहोमहींसुष्टुतिमीरयामि।नमस्याकल्मलीकिनंनमोभिर्गृणीमसित्वेषंरुद्र
स्यनाम।स्थिरेभिरंगैःपुरुरूपउग्रोबभ्रुःशुक्रेभिःपिपिशेहिरण्यैः।ईशानादस्यभुवन

मंत्र स्यभूरेर्नवाउयोषद्रुद्रादसुर्यं। अर्हन्बिभर्षिसायकानिधन्वार्हन्निष्कंयजतंविश्वरूपं।
२० अर्हन्निदंदयसेविश्वमभ्वंनवाओजीयोरुद्रत्वदस्ति ॥६॥ ॥स्तुहिश्रुतंगर्तसदंयुवा
नंमृगंनभीममुपहत्नुमुग्रं। मृळाजरित्रेरुद्रस्तवानोन्यंतेअस्मन्निवपंतुसेनाः। कुमार
श्चित्पितरंवंदमानंप्रतिनानामरुद्रोपयंतं। भूरेर्दातारंसत्पतिंगृणीषेस्तुतस्त्वंभेषजा
रास्यस्मे। यावोभेषजामरुतःशुचीनियाशंतमावृषणोयामयोभु। यानिमनुरवृणी
तापिताताशंचयोश्चरुद्रस्यवश्मि। परिणोहेतीरुद्रस्यवृज्याःपरित्वेषस्यदुर्म
तिर्महीगात्। अवस्थिरामघवद्भ्यस्तनुष्वमीढ्वस्तोकायतनयायमृळ। एवाबभ्रो २०
वृषभचेकितानयथादेवनहृणीषेनहंसि। हवनश्रुन्नोरुद्रेहबोधिबृहद्वदेमविदथे
सुवीराः॥७॥ ॥इतितृतीयं॥ ॥तमुष्टुहियःस्विषुःसुधन्वायोविश्वस्यक्षयतिभे

षजस्य। यक्ष्वामहेसौमनसायरुद्रंनमोभिर्देवमसुरंदुवस्य। इमारुद्रायस्थिरधन्वनेगि
रः क्षिप्रेषवेदेवायस्वधाव्ने। अषाळ्हायसहमानायवेधसेतिग्मायुधायभरताशृणो
तुनः। सहिक्षयेणक्षम्यस्यजन्मनःसाम्राज्येनदिव्यस्यचेतति। अवन्नवंतीरुपनोदुर
श्चरानमीवोरुद्रजासुनोभव। यातेदिद्युदवसृष्टादिवस्परिक्ष्मयाचरतिपरिसावृण
क्तुनः। सहस्रंतेस्वपिवातभेषजामानस्तोकेषुतनयेषुरीरिषः। मानोवधीरुद्रमापरा
दामातेभूमप्रसितौहीळितस्य। आनोभजबर्हिषिजीवशंसेयूयंपा॥०॥४॥ ॥इतिचतु
र्थं। ॥इतिहपोत्सर्गेअन्यत्राप्युपयुज्यते॥ ॥सोमारुद्राधारयेथामसुर्यंप्रवामिष्ट
योरमश्नुवंतु। दमेदमेसप्तरत्नादधानाशंनोभूतंद्विपदेशंचतुष्पदे। सोमारुद्राविवृ
हतंविषूचीममीवायानोगयमाविवेश। आरेबाधेथांनिरृतिंपराचैरस्मेभद्रासौ
श्रवसानिसंतु। सोमारुद्रायुवमेतान्यस्मेविश्वातनूषुभेषजानिधत्तं। अवस्यत

मंत्र· मुंचतंयन्नोअस्तितनूषुवद्धंकृतमेनोअस्मत् ।तिग्मायुधौतिग्महेती सुशेवौसो
२१ मारुद्राविहसुमृळतंनः ।प्रनो मुंचतंवरुणस्यपाशाद्गोपायतंनः सुमनस्यमाना
॥१॥ ॥इदंतुसोमारोद्रं॥ ।।नमोमहद्भ्योनमोअर्भकेभ्योनमोयुवभ्योनमआशिने
भ्यः ।यजामदेवान्यदिशक्नवाममाज्यायसः शंसमावृक्षिदेवाः ।१। ममत्तुनः परिज्मा
वसर्हाममत्तुवातोअपांवृषण्वान् ।शिशीतमिंद्रापर्वतायुवंनस्तन्नोविश्वेवरिवस्यं
तुदेवाः ।२। कथातेअग्नेशुचयंतआयोर्ददाशुर्वाजेभिराशुषाणाः ।उभेयत्तोकेत
नयेदधानाऋतस्यसामन्रणयंतदेवाः ।३। यज्ञेनयज्ञमयजंतदेवास्तानिधर्माणि
।४। पराशुभ्राअयासोयव्यासाधारण्येवमरुतोमिमिक्षुः ।नरोदसीअपनुदंतघोराजु २१
षंतवृधंसख्यायदेवाः ।५। तेरायइंद्रतोशतमाःप्रणेतारः कस्यचिदृतायोः ।तेषुणोम

रुतोमृळयंतुयेस्मापुरागातूयंतीवदेवाः ।६। उभाशंसानर्यामामविष्टामुभेमामू
तीअवसासचेतां ।भूरिचिदर्यः सुदास्तरायेषामदंतइषयेमदेवाः ।७। उतनईंमरुतो
वृद्धसेनाःस्मद्रोदसीसमनसः सदंतु ।पृषदश्वासोवनयोनरथारिशादसोमित्रयुजो
नदेवाः ।८। तवस्यामपुरुवीरस्यशर्मन्नुरुशंसस्यवरुणप्रणेतः ।यूयंनः पुत्राअदि
तेरदब्धाअभिक्षमध्वंयुज्यायदेवाः ।९। दिवश्चिदातेरुचयंतरोकाउषोविभातीर
नुभासिपूर्वीः ।अपोयदग्नउशधग्वनेषुहोतुर्मंद्रस्यपनयंतदेवाः ।१०। शंसामहा
मिंद्रंयस्मिन्विश्वाआकृष्टयः सोमपाः काममव्यन् ।यंसुक्रतुंधिषणेविभ्वतष्टंघनंवृ
त्राणांजनयंतदेवाः ।११। निरुत्तमाद्दूणशारोचनानित्रयोराजस्यसुरस्यवीराः ।सत्यावा
नइषिराइरुभासस्त्रिरादिवोविदथेसंतुदेवाः ।१२। नापाभूतनवोतीतृषामानिःश

स्तासक्षवोयज्ञेअस्मिन्॥ सभिंद्रेणमदथसंमरुद्भिःसंराजभीरत्नधेयायदेवाः॥१३॥प्र
२२ प्रतीतोजयातिसंधनानिप्रतिजन्यान्युतयासजन्या। अवस्यवेयोवरिवःकृणोतिब्र
ह्मणेराजातमवंतिदेवाः॥१४॥कोवस्त्राताववसवःकोवरूतायावाभूमीअदितेत्रासीथां
नः। सदीयसोवरुणमित्रमर्त्तात्कोवोध्वरेवरिवोधातिदेवाः॥१५॥त्वमपोयद्देवतुर्वशायार
६ मयःसुदुघाःपारइंद्र। उग्रमयातमवहोहकुत्संसंहयद्वामुशनारंतदेवाः॥१६॥मूर्धानंदिवो
अरतिंपृथिव्यावैश्वानरमृतआजातमग्निं॥कविंसम्राजमतिथिंजनानामासन्नापा
त्रंजनयंतदेवाः॥१७॥नाभिंयज्ञानांसदनंरयीणांमहामाहावमभिसंनवंत। वैश्वानरंर २२
थ्यमध्वराणांयज्ञस्यकेतुंजनयंतदेवाः॥१८॥तेनोरायोद्युमतोवाजवतोदातारोभूत
नृवतःपुरुक्षोः। दशस्यंतोदिव्याःपार्थिवासोगोजाताअप्याम्कतास्रदेवाः॥१९॥येक
वज्मामहिनोअहिमायादिवोजज्ञिरेअपांसधस्थे। तेअस्मभ्यमिषयेविश्वमायुः

क्षपउस्रावरिवस्यंतुदेवाः॥२०॥अस्मेरुद्रामेहनापर्वतासोवृत्रहत्येभरहूतौसजोषाः॥यः
शंसतेस्तुवतेधायिपज्रइंद्रज्येष्ठाअस्मांअवंतुदेवाः॥२१॥परिप्रधन्वेंद्रायसोमस्वादु
र्मित्रायपूष्णेभगाय। इंद्रस्तेसोमसुतस्यपेयाःक्रत्वेदक्षायविश्वेचदेवाः॥२२॥प्रयाजान्मे
अनुयाजांश्चकेवलानूर्जस्वंतंहविषोदत्तभागं। घृतंचापांपुरुषंचौषधीनामग्नेश्चदीर्घमा
युरस्तुदेवाः॥२३॥एभिर्देद्वहव्यापोस्यानियेभिरोक्षिद्वृत्रहत्यायवज्री। येकर्मणःसु
क्रियमाणस्यमह्नऋतेकर्ममुदजायंतदेवाः॥२४॥अनृक्षराऋजवःसंतुपंथायेभिःसखा
योयंतिनोवरेयं। समर्यमासंभगोनोनिनीयात्संजास्पत्यंसुयममस्तुदेवाः॥२५॥गृ
भ्णामितेसौभगत्वायहस्तंमयापत्याजरदष्टिर्यथासः। भगोअर्यमासवितापुरंधि
र्मह्यंत्वादुर्गार्हपत्यायदेवाः॥२६॥समस्मिन्जायमानआसतग्नाउतेमवर्द्धन्नद्याः
स्वगूर्त्ताः। महेयत्त्वापुरूरवोरणायावर्धयंदस्युहत्यायदेवाः॥२७॥ब्रह्मचारीच

मंत्रसं· रतिवेविषद्विषः सदेवानांभवत्येकमंगं। तेनजायामन्वविंदद्बृहस्पतिः सोमेननीतांजुह्व
२२ न्नदेवाः॥२८॥ सद्योजातोव्यमिमीतयज्ञमग्निर्देवानामभवत्पुरोगाः। अस्यहोतुःप्रदि
दिश्यृतस्यवाचिस्वाहाकृतंहविरदंतुदेवाः॥२९॥ इदंतेपात्रंसनवित्तमिंद्रपिबासोम
मेनाशतक्रतो। पूर्णआहावोमदिरस्यमध्वोयंविश्वइदभिहर्यंतदेवाः॥३०॥ ॥
अथआयुः। भद्रंकर्णेभिःशृणुयामदेवाभद्रंपश्येमाक्षभिर्यजत्राः। स्थिरैरंगै
स्तुष्टुवांसस्तनूभिर्व्यशेमदेवहितंयदायुः॥ १ पुनःपुनर्जायमानापुराणीस २३
मानंवर्णमभिशुंभमाना। श्वघ्नीवकृत्नुर्विजआमिनानामर्त्यस्यदेवीजर रा·
यंत्यायुः॥ २ द्रविणोदाद्रविणसस्तुरस्यद्रविणोदाःसनरस्यप्रयंसत्।
द्रविणोदावीरवतीमिषंनोद्रविणोदारासतेदीर्घमायुः॥ ३ उदीर्ध्वंजीवो

असुर्नआगादपप्रागात्तमआज्योतिरेति। आरैक्पंथांयातवेसूर्यो
याअगन्मयत्रप्रतिरंतआयुः॥ ५ इमेभोजाअंगिरसोविरूपादिवस्पुत्रा
सोअसुरस्यवीराः। विश्वामित्रायददतोमघानिसहस्रसावेप्रतिरंतन
आयुः॥ ६ यथाहस्यदूसवे[illegible]येचित्पदिषितामुंचतायजत्राः। एवो
ष्वस्मन्मुंचताव्यंहः प्रतार्यग्नेप्रतरंनआयुः॥ ७ यःशस्करंबलवंतंप्रक्ष
स्वंतमेवराजाधिपतिर्बभूव। संकीर्णनागाश्वपतिर्नराणांसुमंगलस्यसत
तंदीर्घमायुः॥ ८ गोमायुरदादजमायुरदात्पृश्निरदाद्धरितोनोवसूनि।
गवांमंडूकाददतःशतानिसहस्रसावेप्रतिरंतआयुः॥ ९ सहृदरेणस

सख्यासच्येयोमानरिषेद्भूयेश्वपीतिः। अयंसोमोन्यधाय्यस्मेनस्मा
इंद्रप्रतिरमेम्यायुः। १० अपूसा अस्तुरनि॥यः रेआमीवानिरत्र संत
मीषीचीरभेषुः। आसोमीअस्मांअरु हद्विहायाअगुन्मयत्रप्रतिरंत
आयुः। ११ द्याष्टिंदिवः शतधारः पवस्वसहस्रवाजयुर्देववीतो। संसिंधु
भिःकलशसेवावशानः समुस्त्रियाभिःप्रतिरंनआयुः। १२ सवितापश्चात्तात्स
वितापुरस्तात्सवितोत्तरात्तात्सविताधरात्तात्। सवितानः सुवतुसर्वतातिं
सवितानोरासतांदीर्घमायुः। १३ नवोनवोभवतिजायमानोह्नांकेतुरुष
सामेत्यग्रे। भागंदेवेभ्योविदधात्यायन्प्रचंद्रमास्तिरतेदीर्घमायुः। १४

विघ्नन्नपापतंतीहविद्योदूरंतीमेअप्याकाम्यानि। ७ जनिष्ठोअपोनर्यः सुजातः
प्रोर्वशीतिरतदीर्घमायुः। १५ उच्चादिविदक्षिणावंतोअस्थुर्येअश्वदाः सहते
सूर्येण। हिरण्यदाअमृतत्वंभजंतेवासोदाः सोमप्रतिरंतआयुः। १६ इंद्राव
रुणासोमंनसमहत्संरायंस्पोषंयजमानेषुधत्तं। प्रजांपुष्टिंभूतिमस्मासुध
त्तंदीर्घायुत्वायप्रतिरतंनआयुः। १७ इत्यायुः। हिंकृण्वतीवसुपत्नीवसूनांवत्स
मिच्छंतीमनसाभ्यागात्। दुहामश्विभ्यांपयोअघ्न्येयंसावर्धतांमहतेसौभ
गाय॥ १ समिद्धस्यश्रयमाणःपुरस्ताद्ब्रह्मवन्वानोअजरंसुवीरं। आरेदस्म
मतिंबाधमानउच्छ्रयस्वमहतेसौभगाय २ वनस्पतेशतवल्शोविरोहस

मंत्रसंहिता। इत्स्वब्रस्मगाविवृयंस्रूहेम। यंत्वामयंस्वधितिंस्ते जमानःप्राणिनायमहतेसोम
गाय। ३ इंडुर्देवानामुपसख्येमायन्सहस्रधारःपवतेमदाय। ऋभिस्तवा
२५ नो अनु धामपूर्वमगान्निंद्रंमहतेसोमगाय॥ ४ घनाइर्लुत्तंमधुमत्सु
वर्णधनंजयं धरुणं धाय रयिष्टु। सणकस्सपत्नादधरांश्च कृण्वदाराहमां
महतेसोमगाय। ५ अस्यरिबिवःद्रुमतःप्राच्छितस्येदुसोमस्यवरसास्त
तस्य। स्वस्तिद्रामनरासादरच्चोरयेवोचीनोरेवतेसोमगाय। ६ आनोगोआ
ईंदरद्धिगोपतेगाः सभस्मभ्यंसनयोयंतुवाजाः। हिवक्षा असिहृषभसत्य २५
शुष्मोस्मभ्यंसमघवन्बोधिगोदाः १ अस्माकमित्सुश्रृणुहित्यमिंद्रा रामः

स्मभ्यंचित्रां उपमाहिवाजान्। अस्मभ्यंविश्वायिषणःपुरंधीरस्माकंसुमघवन्बो
धिगोधदाः। २ अथस्वस्तिवाचनमंत्राः। महीद्यौःपृथिवीचन इमंयज्ञंमिमिक्ष
तां। पिपृतांनोभरीमभिः। १ ओषधयःसंवदंतेसोमेनसहराज्ञा। यस्मैकृ
णोतिब्राह्मणःस्तंराजन्पारयामसि। २ आकरेशेषुधावतिपवित्रेपरिषि
च्यते। उक्थैर्यज्ञेषुवर्धते। ३ इमंमेगंगेयमुनेसरस्वतिशुतुद्रिस्तोमंसच
तापरुष्ण्या। असिक्न्यामरुद्वृधेवितस्तयार्जीकीयेश्रृणुह्यासुषोमया। ४
गंधद्वारांदुराधर्षांनित्यपुष्टांकरीषिणीं। ईश्वरींसर्वभूतानांतामिवोव
ह्वयेश्रियं।। ५ पूर्णादर्विपरापतसुपूर्णापुनरापत। वस्नेवविक्रीणावहै

मंत्रसंहि० इषमूर्जे शतक्रतो। ७ या ओषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा। मनैनु ब
भ्रूणामहं शतं धामानि सप्त च। ८ अश्वत्थे वो निषदनं पर्णे वो वसतिष्कृता। गो
भाज इत्किलासथ यत्सनवथ पूरुषं ९ स्योना पृथिवि भवानृक्षरा निवेशनी।
यच्छा नः शर्म सप्रथः। १० याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः। बृह
२६ स्पतिप्रसूतास्ता नो मुंचंत्वंहसः ११ सहिरत्नानि दाशुषे सुवाति सविता भ
गः। तं भागं चित्रमीमहे। १२ हिरण्यरूपः स हिरण्यसंदृगपां नपात्सेदु हिर २६
ण्यवर्णः। हिरण्ययात्परि योनेर्निषद्या हिरण्यदा ददत्यन्नमस्मै। १३ युवा रा२०
सुवासाः परिवीत आगात्स उ श्रेयान्भवति जायमानः। तं धीरासः कव

य उन्नयंति स्वाध्यो३ मनसा देवयंतः। १४ तत्त्वा यामि ब्रह्मणा वंदमानस्त
दाशास्ते यजमानो हविर्भिः। अहेळमानो वरुणेह बोध्युरुशंस मान आ
युः प्रमोषीः। १५ मातृदेवो भव॥ पितृदेवो भव। आचार्यदेवो भव। अति
थिदेवो भव। अवनुक्रतजानुमंडलः कमळमुकुटसदृशौ मंजलौ शि
रस्याधाय दक्षिणेन पाणिना सुवर्णपूर्णकलशं धारयित्वा। भद्रं
कर्णेभिः शृणु० द्रविणोदा० सविता पश्चा० नवोनवो भ०। उद्वादि०
५ आपउदं तु जीवसे दीर्घायुत्वाय वर्चसे। यस्त्वा हृदा कीरिणा म
न्यमानो मर्त्यं मर्त्यो जोहवीमि। जातवेदो यशो अस्मासु धेहि प्रजाभि

मंत्रसंहिता· रमे अमृतत्वमश्यां॥ यस्मै त्वं सुकृते जातवेद उ लोकमग्ने कृणवः स्योनं।
अश्विनं स पुत्रिणं वीरवंतं गोमंतं रयिं नशते स्वस्ति। सं त्वा सिंचामि
यजुषा प्रजामायुर्धनं च। बृहस्पतिप्रसूतो यजमान इह मा रिष
२७ त्। ३ निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो न ओषधयः प
च्यंतां। योगक्षेमो नः कल्पतां। उद्गातेव शकुने साम गायसि ब्रह्म
पुत्र इव सवनेषु शंससि। वृषेव वाजी शिशुमतीरपीत्या सर्वतो नः
शकुने भद्रमावद विश्वतो नः शकुने पुण्यमावद। याज्यया जेयेति २७
प्रसुवैयाज्याः पुण्येव लक्ष्मीः पुण्यामेवतल्लक्ष्मीं संभावयति पु राम

ण्यांल्लक्ष्मीं स्वस्ति कुरुते। पस्पुण्यं नक्षत्रं। तद्वद्कुर्वतोपव्यूषं यदा वैस्
र्य उदेति। अनक्षत्रं नेति। यावति तत्र सूर्यो गच्छेत्। यत्र जघन्यं पश्ये
त्। तावति कुर्वत यत्कारी स्यात्। पुण्याह एव कुरुते। तानि एतानि यमन
क्षत्राणि। तान्येव देवनक्षत्राणि। ३ तेषु कुर्वत यत्कारी स्यात्। पुण्याह ए
व कुरुते। स्वस्त्ये वायुमुप ब्रवा महे सोमं स्वस्ति भुवनस्य यस्पतिः। बृहस्पतिं
सर्वगणं स्वस्तये स्वस्तय आदित्यासो भवंतु नः। ३ आ दित्सु उपश्रनीयः प
थ्या येवेत स्वस्त्या प्रयंति पथ्यां स्वस्ति मस्युपयंति स्वस्त्यै वेतः प्रयंति स्वस्त्यै
ति स्वस्त्युद्यंति। स्वस्ति न इंद्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः। स्वस्ति
नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु। अहोदे वावस

मंत्रसंहिता। वः सोम्यासः चतस्रो देवीरजराः श्रविष्ठाः॥ ते यज्ञं पांतु रजसः पुरस्ता
नंष्फलविपा० त्॥ संवत्सरीणममृतं स्वस्ति। ऋध्याम स्तोमं सनुयाम वाजमा नो मंत्रं स
२८ रथेहोप यातं। यशो न पक्वं मधु गोष्वंतरा भूतांशो अश्विनोः काममप्राः॥
सर्वो म्हद्धिम्न ध्यायामिति लेवेतज्ज सेवपुरस्तात्पथ्ये अवद्धं दोषिमि ध्याता
सेरेरुपतिष्ठात्त्वगा यच्छ्यासवे तौरव द्वादश्रा हूंपरिभ्र यस सर्वा म्रद्धिमा ध्यो:
सर्वा म्रद्धिम्न ध्योति य एवं वेद। सध्यास्म हव्यैर्नमसोपसद्य। मित्रं देवं मित्र
धेयं नो अस्तु। अनूराधान्हविषा वर्धयंतः। शतं जीवेम शरदः सवीराः॥ २९
त्रीणि त्रिणि वै देवानामृद्धाणि। त्रीणि छंदांसि त्रीणि सवनानि। त्रय इमे पान२०
लोकाः। सध्यामेव तद्वीयेषु लोकेषु धाति तिष्ठाति। श्रिये जातः श्रियआ

निरियाय श्रियं वयो जरितृभ्यो दधाति। श्रियं वसाना अमृतत्वमायन्भवं
ति सत्यास्समिथा मितद्रौ। श्रिय एवैनं तच्छ्रियआमादधाति संततमृ
चा वषट्कृत्य संतत्यै संधीते प्रजया पशुभिः श्रिय एवं वेद। यस्मिन्ब्रह्माभ्य
जन्यत्सर्वमेतदमुं च लोकमिदमु च सर्वं। तन्नोनक्षत्रमभिजिद्विजि
त्य श्रियं दधात्वहृणीयमानं। अहे बुध्निय मंत्रं मे गोपाय। यमृषयस्त्रैवि
दा विदुः। ऋचः सामानि यजूंषि सा हि श्रीरमृता सतां। शुक्रेभिरंगैरज
आततन्वान्क्रतुं पुनानः कविभिः पवित्रैः। शोचिर्वसानः पर्यायुरपां श्रियो
मिमीते बृहतीरनूनाः। तदप्येषश्लोको भिगीतो मरुतः परिवेष्टारो मरुत्त
स्यावसन्गृहे। आविक्षितस्य कामप्रे विश्वेदेवाः सभासद इति। अथा

नंष्यलं विधा० भिषेकमंत्राः॥ समुद्रज्येष्ठाः सलिलस्य मध्यात्पुनानायंत्यनिवि
शमानाः॥ इंद्रोयावज्रीवृषभोरराद ता॰ आपोदेवीरिह मामवंतु॥
या आपोदिव्या उतवास्रवंतिखनित्रिमा उतवायाः स्वयंजाः॥ समुद्रा
र्थायाः शुचयःपावकास्ता आपोदेवी॰ यासां राजा वरुणोयातिम
२९ ध्येसत्यानृते अवपश्यंजनानां। मधुश्चुतः शुचयोयाःपावकास्ता०
यासुराजा वरुणोयासुसोमोविश्वेदेवा यासूर्जंमदंति। वैश्वानरो
यास्वग्निःप्रविष्टस्ता० वायंनामिहदेवास्त्रायतांमरुतांगणाः। त्रायं २९
तांविश्वाभूतानि यथायमरपा असत्। आपइद्वा उभेषजीरापोअ ष्पिषान्
मीवचातनीः। आपःसर्वस्य भेषजीस्तास्ते कृण्वंतु भेषजं। हस्ता

भ्यां दशशाखाभ्यां जिह्वा वाचःपुरोगवी। अनामयित्नुभ्यां त्वा ताभ्यां त्वोप
स्पृशामसि। इमा आपः शिवतमा इमाः सर्वस्य भेषजीः। इमा राष्ट्रस्य वर्द्ध
नीरिमा राष्ट्रभृतोमृताः। याभिरिंद्रमभ्यषिंचत्प्रजापतिः सोमं राजानं
वरुणं यमं मनुं। ताभिरद्भिरभिषिंचामि त्वामहं राज्ञां त्वमधिराजो भव
वेह। महांतं त्वामहीनां सम्राजं चर्षणीनां। देवीजनित्र्यजीजनद्भद्रा ज
नित्र्यजीजनत्। देवस्य त्वा सवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णो ह
स्ताभ्यामग्नेस्तेजसा सूर्यस्य वर्चसेंद्रस्येंद्रियेणाभिषिंचामि ब
लाय श्रियै यशसेन्नाद्याय॥ इंद्रियं वा एतदस्मिंल्लोके यद्दधिय
द्दध्नाभिषिंचतींद्रियमेवास्मिंस्तद्दधाति रसो वा एष ओषधिवन

स्पतिषुयन्तः धुयन्त्य ध्वाभिषिंचतिरसमेवास्मिंस्तद्दधाति तेजो वा एत
स्य शष्नांय दूर्वं यद्धृतेनाभिषिंचति तेज वा एवास्मिंस्तद्दधा सम्नतवा एत
दास्मिंल्लोके यदापो यदद्भिरभिषिंचात्यमृतत्वमेवास्मिंस्तद्दधाति सो
भिषिक्तोभिषिक्तो ब्राह्मणाय हिरण्यं दद्यात्सहस्रं दद्यात्क्षेत्रं चतुष्पा
द्याद्द्यात्प्राकुरसंख्यातमेवोपरिमितं दद्यादपरिमितो वै क्षत्रियाप
रिमितस्यावरुद्ध्यापिसथास्मै सुराकंसं हस्त आदधाति स्वादिष्ठ
यामदिष्ठया पवस्व सोम धारया । इंद्राय पातवे सुत इति तां पिबेद्य
तच्छिष्टं रासिनः सुतस्य यदिंद्रो अपिबच्छचीभिः इदं तदस्य मनसा
शिवेन सोमं राजानमिह भक्षयामि । अभित्वा वृषभा सुते सुतं सृजा

मिपीतये । तृंपा व्यश्नुहीमदमिति यो ह वा अस्य सोमपीथः सुरायां प्रवि
ष्टः स हैवं तेनैंद्रेण महाभिषेकेणाभिषिक्तस्य क्षत्रियस्य भक्षितो
भवति न सुरा तां पीताभिमंत्रयेत पाम सोमं शंतमो भवति तद्यथो वा
दः प्रियः पुत्रः पितरं प्रिया वा जाया पतिं सुखं शिवमुपस्पृशत्याविस्रसः ए
वं ह वै तेनैंद्रेण महाभिषेकेणाभिषिक्तस्य क्षत्रियस्य सुरा वा सोमो वा
न्यद्वान्नाद्यं सुखं शिवमुपस्पृशत्याविस्रसः १ अथ गर्भाधानमंत्राः
विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिंशतु । आसिंचतु प्रजापतिर्धाता
गर्भं दधातु ते । गर्भं धेहि सिनीवालि गर्भं धेहि सरस्वति । गर्भं ते अ
श्विनौ देवावाधत्तां पुष्करस्रजा । हिरण्ययी अरणी यं निर्मंथतो अ
श्विना । तं ते गर्भं हवामहे दशमे मासि सूतवे १ नेजमेष परापत सुपु

त्रः पुनराप्तन्। अस्ये मे पुत्रकामायै गर्भमाधेहि यः पुमान्। यथेयं पृथि
वी मह्युत्ताना गर्भमादधे। एवं तं गर्भमाधेहि दशमे मासि सूतवे
। विष्णोः श्रेष्ठेन रूपेण। अस्यां नार्यां गवीन्यां। पुमांसं पुत्रमाधेहि द
शमे मा० प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परिता बभूव।
यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणां। अप
नः शोशुचदघमग्ने शुशुग्ध्या रयिं। अप नः शोशुचदघं। सुक्षेत्रि
या सुगातुया वसूया च यजामहे। अप नः० प्रयद्भंदिष्ठ एषां प्रा
स्माकासश्च सूरयः। अप नः० प्रयत्ते अग्ने सूरयो जायेमहि प्र ते
वयं। अप नः। प्रयदग्नेः सहस्वतो विश्वतो यंति भानवः। अप० त्वं

हि विश्वतोमुख विश्वतः परिभूरसि। अप नः० द्विषो नो विश्वतोमु
खाति नावेव पारय। अप नः। स नः सिंधुमिव नावयाति पर्षा स्व
स्तये। अप नः० ८।। याः फलिनीर्या अफला अपुष्पा याश्च पु
ष्पिणीः। बृहस्पतिप्रसूतास्ता नो मुंचंत्वंहसः। वधेन दस्युं प्र
हि चातयस्व वयः कृण्वानस्तन्वे३ स्वायै। पिपर्षि यत्सहसस्पुत्र
देवान्त्सो अग्ने पाहि नृतम वाजे अस्मान्। वयं ते अद्य रेरिमा उ क्षै
विधेम वयं हव्यैः पावक भद्रशोचे। अस्मे रयिं विश्ववारं समि
न्वास्मे विश्वानि द्रविणानि धेहि। अस्माकमग्ने अध्वरं जुष
स्व सहसः सूनो त्रिषधस्थ हव्यं। वयं देवेषु सुकृतः स्याम शर्

मंत्रसं विधा म॑एणा मा त्रिवरूथेन पाहि। विश्वानि नो दुर्गहा जातवेदः सिंधुं न नावा दुरिता
तिपर्षि॥ अग्ने अत्रिवन्नमसा गृणानोऽस्माकं बोध्यविता तनूनां। य
स्त्वा हृदा कीरिणा मन्यमानोऽमर्त्यं मर्त्यो जोहवीमि। जातवेदो यशो
३२ अस्मासु धेहि प्रजाभिरग्ने अमृतत्वमश्यां। यस्मै त्वं सुकृते जात
वेद उ लोकमग्ने कृणवः स्योनं। अश्विनं स पुत्रिणं वीरवंतं गोमंतं र
यिं नशते स्वस्ति। ५ अग्निस्तुविश्रवस्तमं तुविब्रह्माणमुत्तमं।
अतूर्तं श्रावयत्पतिं पुत्रं ददाति दाशुषे। अग्निर्ददाति सत्पतिं सासा भा०२
ह यो युधा नृभिः। अग्निरत्यं रघुष्यदं जेतारमपराजितं। सूर्यो नो दि ३२
वस्पात्विति सादि पंचर्च सूक्तं प्राग्वत्। उदीर्ष्वातः पतिवती ह्येषा

विश्वावसुं नमसा गीर्भिरीळे। अन्यामिच्छ पितृषदं व्यक्तां स ते भागो ज
नुषाः तस्य विद्धि। उदीर्ष्वातो विश्वावसो नमसेळामहे त्वा। अन्यामिच्छ प्र
फर्व्यं। सं जायां पत्या सृज। अनृक्षरा ऋजवः संतु पंथा येभिः सखायो यंति नो वरेयं।
मामेरयस्व यस्यां बीजं मनुष्या ३ वपंति। या न ऊरू उशती विश्रयाते यस्
यामुशंतः प्रहराम शेपं। योगर्भमोषधीनां गवां कृणोत्यर्वतां। पर्जन्यः
पुरुषीणां। अहं गर्भमदधामोषधीष्वहं विश्वेषु भुवनेष्वंतः। अहं प्रजा
अजनयं पृथिव्यामहं जनिभ्यो अपरीषु पुत्रान्। इति गर्भाधानमं
त्राः॥ पुंसवनमंत्र दूर्वारसक्षेपणे सूक्तो दूर्यं। आ ते गर्भो योनि
मेतु पुमान्बाण इवेषुधिं। आवीरो जायतां पुत्रस्ते दशमास्यः। अ=

नंष्पलं वि० ग्निरेतु प्रथमो देवतानां सोस्यै प्रजां मुंचतु मृत्युपाशात्॥ तदयं राजा वरुणोनुमन्य
तां यथेयं स्त्री पौत्रमघं न रोदात्। यत्ते सुसीमे हृदये हितमंतः प्रजापतौ। म
न्येहं मां तद्विद्वांसं माहं पौत्रमघं नियां॥ २ अनेन भार्याहृदयस्पर्शनं। इति
पुंसवने उपयुक्ताः॥ अथ नवलोभनमंत्राः। तत्र सहस्रशीर्षेति षोडशर्चेसू
३३ क्तं पुंसवने उपयुक्तं। तच्छिरिवितमेव प्राग्वत्। हिरण्यगर्भः समवर्तताग्रे भूतस्य
जातः पतिरेक आसीत्। स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा प्वी३पान्
विधेम। य आत्मदा बलदा यस्य विश्व उपासते प्रशिषं यस्य देवाः। यस्य
छायामृतं यस्य मृत्युः कस्मै देवाय हविषा वि० यः प्राणतो निमिषतो म ३३

हित्वैक इद्राजा जगतो बभूव। य ईशे अस्य द्विपदश्चतुष्पदः। कस्मै० येस्येमे
हिमवंतो महित्वा यस्य समुद्रं रसया सहाहुः॥ यस्येमाः प्रदिशो यस्य बाहू क०
येन द्यौरुग्रा पृथिवी च दृढा येन स्वः स्तभितं येन नाकः। यो अंतरिक्षे रजसो
विमानः कस्मै० २ यं क्रंदसी अवसा तस्तभाने अभ्यैक्षेतां मनसा रेजमाने।
यत्राधि सूर उदितो विभाति कस्मै० ७ आपो ह यद्बृहतीर्विश्वमायन्ग
र्भं दधाना जनयंतीरग्निं। ततो देवानां समवर्ततासुरेकः। कस्मै० यश्चि
दापो महिना पर्यपश्यद्दक्षं दधाना जनयंतीर्यज्ञं। यो देवेष्वधि देव एक
आसीत्कस्मै० मा नो हिंसी० २ ताः षोडशर्चाः श्वसमहोमोपयुक्ताः॥ आ
युष्यमिति सूक्तं गुर्विणीकुक्ष्यभिमंत्रणे विनियुक्तं॥ आयुष्यं वर्चस्यं रा

नं ष्वलं विप्र। यस्योषमोद्भिदं। इदं हिरण्यं वर्चस्वज्जैत्रायाविशतादिमा। उच्चैर्वाजि
पृतनाषाट्सभासाहं धनंजयं। सर्वाः समग्रा ऋद्धयो हिरण्येस्मिन्समा
हिताः। शुनमहं हिरण्यस्य पितुर्नामेव जग्रभ। तेन मां सूर्यत्वचमकरं
३४ पुरुषुप्रियं। सम्राजं च विराजं चाभिश्रीर्या च मे ध्रुवा। लक्ष्मी राष्ट्रस्य या
मुखे तया मामिन्द्र संसृज। अग्नेः प्रजातं परि यद्धिरण्यममृतं जज्ञे अधि
मर्त्येषु। य एनद्वेद स इदेनमर्हति जरामृत्युर्भवति यो बिभर्ति। यद्वेद रा श्री पान
जा वरुणो यदु देवी सरस्वती। इन्द्रो यद्वृत्रहा वेद तन्मे वर्चस आयुषे ३४
तद्दक्षांसि न पिशाचास्तरंति देवानामोजः प्रथमजं ह्येतत्। यो बि
भर्ति दाक्षायणा यहिरण्यं स देवेषु कृणुते दीर्घमायुः समनुष्येषु कृणुते दीर्घ

मायुः। यदाबध्नन्दाक्षायणा हिरण्यं शतानीकाय सुमनस्यमानाः। तन्न
आ बध्नामि शतशारदायायुष्मान्जरदृष्टिर्यथासत्। घृतादुल्लुप्तं मधु
मत्सुवर्णं धनंजयं धरुणं धारयिष्णु। ऋणक्सपत्नान्दधरांश्च कृ
ण्वदारोह मां महते सौभगाय। प्रियं मा कुरु देवेषु प्रियं राजसु मा कुरु।
प्रियं विश्वेषु गोप्त्रेषु मयि धेहि रुचा रुचं। अग्निर्येन विराजति सूर्यो
